अविरोधेन सप्तानार्थानामिह संगतिः ।
उत्तरोत्तरदौर्बल्यं वाच्यं संकोचतः परम् ॥ ७ ॥

भाषात्रयविरोधश्च कल्पभेदात्समाहितः ।
भाषात्रयविभेदश्च लक्षणैर्ज्ञाप्यते पुनः ॥ ८ ॥

अर्थत्रयं तु वक्ष्यामि निबंधेऽस्ति चतुष्टयम् ।
अत्र संतः स्वसंतोषैराज्ञां यच्छंतु सिद्धये ॥ ९ ॥

सुज्ञेषु हस्तयुगलं पुरतो विधाय,
विज्ञापयामि मुरवैरिपदाब्जनिष्ठः ।
उच्छृंखलापि विवृतिर्मम चिंतनीया,
श्रीकृष्णपादयुगलेविनिवेशितेति ॥१०॥

इति श्रीवल्लभाचार्यविरचितायां सुबोधिन्यां प्रथमस्कंधभा० व्या० कारिकाः समाप्ताः ।

## अथ शिक्षाश्लोकाः ।

श्रीकृष्णाय नमः ।

यदा बहिर्मुखा यूयं भविष्यथ कथं चन ।
तदा कालप्रवाहस्था देहचित्तादयोऽप्युत ॥ १ ॥

सर्वथा भक्षयिष्यंति युष्मानिति मतिर्मम ।
न लौकिकः प्रभुः कृष्णो मनुते नैव लौकिकम् ॥ २ ॥

भावस्तत्राप्यस्मदीयः सर्वस्वश्चैहिकश्च सः ।
परलोकश्च तेनायं सर्वभावेन सर्वथा ॥
सेव्यः स एव गोपीशो विधास्यत्यखिलं हि नः ॥ ३ ॥

इति श्रीवल्लभाचार्यविरचिताः शिक्षाश्लोकाः समाप्ताः

(इमे श्रीमदाचार्यैः काश्यामासुरव्यामोहलीलावसरे स्वात्मज श्रीगोपीनाथश्रीविट्ठलनाथौ प्रत्युपदिष्टाः ॥

तदैव भगवता प्रादुर्भूयायं सार्धश्लोक उक्तः ॥
मयि चेदस्ति विश्वासः श्रीगोपीजनवल्लभे ॥
तदा कृतार्था यूयं हि शोचनीयं न कर्हि चित् ॥१॥
मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिरिति) ॥